तदहरुच्यते"। सुरासुराणामन्योन्यमहोरात्रं विपर्य्ययात् यत् प्रोक्तं तद्भवेद्दिव्यं भानोर्भगणपूरणात्। पित्र्यमाह "त्रिंशत्तिथ्यात्मको मासश्चान्द्रः पित्र्यमहः स्मृतम् निशा च मासपक्षान्तौ तयोर्मध्ये विभागतः"। "भचक्रभ्रमणं नित्यं नाक्षत्रं दिनमुच्यते। मन्वन्तरव्यवस्था च प्रजापत्यमुदाहृतम् इति संक्रान्त्यासौरमुच्यते इति च सू०सि० वार्हस्पत्यमब्दशब्दे उक्तम् तेषु नवसु मध्ये चतुर्भिरेव व्यवहारः "चतुर्भिर्व्यवहारोऽत्र सौरचान्द्रार्क्षसावनैः" वार्हस्पत्येन षष्ट्यब्दं ज्ञेयं नान्यैस्तु नित्यशः। सू० सि० तत्र सौरनाक्षत्रादिप्रमाणमुक्तम्। "नाड़ीषष्ट्या तु नाक्षत्रमहोरात्रं प्रकीर्त्तितम्। तत्त्रिंशताभवेन्मासः सावनोऽर्कोदयैस्तथा इति चान्द्रमाह "अर्काद्विनिःसृतः प्राचीं यद्यात्यहरहः शशी तच्चान्द्रमसमंशैस्तु ज्ञेया द्वादशभिस्तिथिः" एतेषां कार्य्यभेदे ग्रहणमाह स एव "तिथिः करणमुद्वाहः क्षौरं सर्व्वाः क्रियास्तथा। व्रतोपवासयात्राणां क्रिया चान्द्रेण गृह्यते। उदयादुदयः भानोः सावनं परिकीर्त्तितम्। सावनानि स्युरेतेन यज्ञकालावधिस्तु तैः। सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा। मध्यमग्रहभुक्तिश्च सावनेनैव गृह्यते। अस्य तत्पुरुषान्ते टच् समा० पुंस्त्वञ्च एकाहः दीर्घाहः पुण्याहं तु न०। अव्ययादिपूर्व्वपदत्वे एकदेशिसमासे द्विगौ च टच् अह्नादेशश्च अत्यह्नः मध्याह्नः पूर्व्वाह्ण" पु०। उत्तरपदद्विगावेव अह्नादेशः न समाहारद्विगौ द्व्यहः त्र्यहः। उत्तरपदे तु द्व्यह्नप्रिय एवं तद्धितार्थे नाह्नादेशः द्व्यहीनः इत्यादि। कालत्वात् भवादौ ठञ् अह्नादेशः आह्निकः ख अहीनः दिनभवे त्रि०। २विष्णौ तस्य सर्व्वदा प्रकाशमानत्वात् तथात्वम्" "अहः संवत्सरो मासः" विष्णुस०। अर्च्चिरादिमार्गे आतिवाहिके ३अहरभिमानि देवे—च। "ते अर्च्चिषमभिसम्पद्यन्ते अर्च्चिषोऽहः अह्न आपूर्य्यमाणपक्षम्" छा०उ०। एतदधिकृत्य "अतिवाहिकास्तल्लिङ्गात्" शा०सूत्रे आतिवाहिकत्वमेषां निर्णीतम् ४रात्रौ च। "यामश्चत्वारश्चारोर्मत्याना महनी उभे"। "अयने अहनी प्राहुरिति च" भा०२स्क०

**अहना** स्त्री अहर्मुखत्वेनास्त्यस्याः अच् नि० टिलोपाद्यभावः। उषायाम् निरु०। "गृहंगृहमहना यात्यच्छा" ऋ०१,१२३,४ "अहना उषेति" भाष्यम्।

**अहन्ता** स्त्री अहमित्यव्ययमस्मदर्थे तस्य भावः तल्। अस्मदर्थभावे २ममतायाञ्च।

**अहम्** अव्य० अह-अमु। अहङ्कारार्थे, अस्मदर्थे "अहमर्थोदयोयोऽयं चित्तात्मा वेदनात्मकः। एतच्चित्तद्रुमस्यास्य वीजं विद्धि महामते" वासि०। अहंप्रत्ययः। अहङ्कारः

**अहमहमिका** स्त्री अहमहंशब्दोऽस्त्यत्र वीप्सायां द्वित्वम् ठन् न टिलोपः। १परस्पराहङ्कारे २अहमेवाग्रे यास्यामीति रूपायामन्योन्योक्तौ च।

**अहम्पूर्व्विका** स्त्री अहं पूर्व्वोऽहं पूर्व्वं इत्यभिधानं यत्र। योधादीनां औत्सुक्यात् अहमेव पूर्व्वं यास्यामीत्यध्यवसायेनोक्तौ "जवादहंपूर्व्विकया यियासुभिः" किरा०।

**अहम्प्रत्यय** पु० अहमित्याकारकः प्रत्ययः। अहमस्मि ममेत्याद्याकारे बोधे। "अहम्प्रत्ययलिङ्गानि च वैदिकानि" छा०उ०भा०। "नचायमेकान्तेनाविषयः अहम्प्रत्ययविषयत्वात्" शा० भा०। अहंशब्दालम्बनश्चात्मा स च देह एवेति चार्वाकाः। क्षणिकविज्ञानमेवेति बौद्धाः देहादिव्यतिरिक्त इति आस्तिकदर्शनानुसारिणः।

**अहम्भद्र** त्रि० अहमेव भद्र इति निर्णयोयत्र। अहंश्रेयः शब्दार्थे "अथातोमनसश्च वाचश्च अहंभद्र उदितम् मनश्च ह वै वाक्चाहं भद्र ऊदाते। तद्ध मन उवाच अहमेव त्वच्छ्रेयोऽस्मि न मया त्वं किञ्चनानभिगतं वदसि यन्ममत्वं कृतानुवर्त्मा वर्त्मास्यहमेव त्वच्छ्रेयोऽस्मीति अथ ह वागुवाच अहमेव त्वच्छ्रेयस्यस्मि यद्वै त्वं वेत्थाहं तद्विज्ञापयाम्यहं संज्ञापयामीति" शत०ब्रा०।

**अहम्मति** स्त्री अहमित्याकारा मतिः ज्ञानं मन+क्तिन्। १अविद्यायाम् अन्यस्मिन्नन्यधर्म्मावभासके २अज्ञाने।

**अहर** त्रि० न हरति अच् न०त०। १हारकभिन्ने हरोहारकः न०ब०। २हारकशून्ये गणितोक्ते शुद्धे ३राशौ ४असुरभेदे पु० असुरशब्दे उदा०।

**अहरादि** पु० अह्नः आदि। प्रभाते "शशधरमहरादौ रागवानुष्णरश्मिः" माघः। वार्त्तिकोक्ते पत्यादिशब्दे परे रोःस्थाने रेफादेशनिमित्ते अहन् गिर्–धुर् इति शब्दगणे।

**अहर्गण** पु० अह्नां गणः। दिनवृन्दे दिनसमूहे। ग्रहाणां मध्यभावादिज्ञानसाधनानि सृष्ट्यवधि श्वेतवराहकल्पावधि कल्पारम्भावधि वा इष्टदिनपर्य्यन्तं यानि दिनानि गतानि तेषां समूहे। तत्र सृष्ट्याद्यहर्गणस्तावत् "इत्थं युगसहस्रेण भूतसंहारकारकः। कल्पोब्राह्ममहःप्रोक्तं शर्व्वरी तस्य तावती। परमायुः शतं तस्य तयाहोरात्रसंख्यया। आयुषोऽर्द्धमितं तस्य शेषे कल्पोऽयमादिमः। कल्पादस्माच्च